International Journal of Multidisciplinary Horizon

ISSN:3049-2017
IJMH 2025; 2(5): 159-161
© 2025 IJMH
www.themultijournal.com

Received: 16-10-2025
Accepted: 27-10-2025
Publish : 28-10-2025

**कल्पना मुर्म्मू**
शौधच्छात्रा, साहित्य विभागः,
राष्ट्रीय संस्कृत विश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**कल्पना मुर्म्मू**
शौधच्छात्रा, साहित्य विभागः,
राष्ट्रीय संस्कृत विश्वविद्यालयः,
तिरुपतिः

# भासरूपकेषु वर्णितः सामाजिकोत्सवाः आमोद-प्रमोदश्च

**कल्पना मुर्म्मू**

**कूटशब्दाः – सामाजिकोत्सवः, आमोद-प्रमोदः, क्रीडा, उद्यान-क्रीडा, कन्दुक-क्रीडा, जल-क्रीडा, द्यूत-क्रीडा, सर्प-क्रीडा, शक्रध्वजोत्सवः, विवाहोत्सवः, युद्धोत्सवः।**

**प्रस्तावना-**

भास-नाटकीययुगे सामाजिकोत्सवानां आमोद-प्रमोदानां विशेषमेकं महत्त्वं वर्तते। नाटककारभासमतानुसारम् अनेन आमोद-प्रमोदमाध्यमेन मानवानां मानसिकस्वास्थ्यं सुदृढं भवति। तदर्थं तेन स्वनाटकेषु क्रीडा-आमोद-प्रमोद-उत्सव-विनोदानां विशेषस्थानं दीयते।

मानवाः स्वकीये सांसारिकजीवने निरन्तरकार्यकरणेन बहुपरिश्रान्तं भवति। तत् श्रान्तभावं दूरीकरणाय तथा मानसिकस्वास्थरक्षणाय परमावश्यकमस्ति अयं क्रीडा-विनोद-आमोद-प्रमोदमिति। अनेन क्रीडा-विनोदेन जनाः स्वजीवने शक्तिमर्जयन्ति एवं तत् नुतनार्जितेण शक्तिद्वारा ते पुनः कार्याणि कर्तुं शक्नुवन्ति।

परन्तु दिवारात्रसर्वदा विनोदे संयुक्तमनुष्यः क्रीडाप्रियं न भूत्वा व्यसनासक्तः भवति। अतः यथोचितं क्रीडाविनोदसेवनेन मानवजीवनस्य सर्वाङ्गीणविकासं भवति, कार्य-क्षमता वर्धयति, श्रान्तभावस्य शमनं च भवति। एतेषां आमोद-प्रमोद-उत्सवादिनां योगदानं मानवजीवने अनस्वीकार्यम्।

भासनाटकचक्रे विविधक्रीडा, वनविहारं, जलविहारं, उद्यान-परिभ्रमणं, विनोदं, विविध-गोष्ठी, उत्सवादि प्रचलिताऽऽसीत्।

भासविरचित-नाटकेषु सामाजिकोत्सव-आमोद-प्रमोद-क्रीडा-विनोद विषये यानि तथ्यानि उल्लिखितानि सन्ति तानि अधः प्रकटीयते-

**उद्यान-क्रीडा-**

व्यक्तेः सुस्वास्थरक्षणाय उद्यानक्रीडायाः भूमिका अनस्वीकार्यमस्ति। उद्यानस्य वृक्षाणां माधुर्यैः, पुष्पाणां सुगन्धित-वायुना तथा हरित-प्रकृतेः मनोरम-वातावरणेन शरीरे एवं मनसि अत्यन्तं सुस्थमानन्दश्च अनुभूयते। अविमारकम् इति नाटके सुखपूर्वक् उद्याने क्रीडायाः निर्देशमस्ति-

> **"ततो गत्वोद्यानं यथासुखमाक्रीड्य निवर्त्तमानायां**
>
> **राजसुतायां दासीदासहसितकथितश्रवण"।**[1]

**कन्दुक-क्रीडा-**

बहु प्रचलितक्रीडासु अन्यतमाऽस्ति इयं कन्दुकक्रीडा। स्त्री-पुरुष उभयैव इयं क्रीडां क्रीडति। स्त्रीणां मध्ये कन्दुकक्रीडायाः उल्लेखयोग्यं दृष्टान्तमस्ति भासस्य स्वप्नवासवदत्तम्-नाटके। तत्र वासवदत्ता पद्मावती उभयोर्मध्ये कन्दुकक्रीडां दृश्यते। इयं क्रीडा हास-परिहासेन सह विविध प्रक्रियया क्रीडन्ते। नाटकेऽस्मिन् माधवीलता मण्डपे सखीनां मध्ये इयं कन्दुकक्रीडा सुसम्पन्नते-

> **"वासवदत्ता- हला। एष ते कन्दुकः।**
>
> **पद्मावती- आर्ये! भवत्विदानीमेतावत्।**
>
> **वासवदत्ता- हला अतिचिरं कन्दुकेन क्रीडित्वाधिकसञ्जातरागो**
>
> **परकीयाविव ते हस्तौ संवृत्तौ"।**[2]

**जल-क्रीडा-**

मनोविनोदनाय अत्यन्तमुपयोगी पन्था भवति जलक्रीडा। सखीभिः सहेयं क्रीडां सम्पाद्यते। प्रतिज्ञायौगन्धरायणनाटके यज्जलक्रीडाभिलाषिणी वासवदत्ता भद्रवती परिचारक-गात्रसेवकस्य कृते प्रतीक्षां करोति।[3]

**द्यूत-क्रीडा-**

मनोविनोदनार्थं राजपरिवारस्य जनाः प्रायः द्यूतक्रीडा आयोज्यन्ते। कालक्रमेण ते इयं क्रीडां प्रति व्यसनासक्तः भवन्ति। ते स्वमनसः समस्त- नैतिकता-सत्य-धर्म-दया आदि गुणान् विसर्जयित्वा इयं क्रीडां क्रीडन्ति एवं पराजितात् परं स्वसम्पत्ति-आभूषण-राज्य-मान-स्त्री आदि सर्वं हरन्ति।

यतो हि पञ्चरात्रम् नाटके राजसभायाम् आयोजित द्यूतक्रीडायां पराजितानां पाण्डवानां मानापहरणपूर्वकं बहु अपमानं क्रियते। आचार्य द्रोणेन युधिष्ठिरं द्यूताश्रयवृत्तिर्युधिष्ठिरः[4]इति वचनेन अभिधीयते।

एवं- **यत् पुरा ते सभामध्ये राज्ये माने च घर्षिताः।**
**बलात्कारसमर्थैस्तैः किं रोषो धारितस्तदा।**[5]

पुनः दूतवाक्यम् नाटकेऽपि दृश्यते यत्-

**सत्यधर्मघृणायुक्तो द्यूतविभ्रष्टचेतनः।**
**करोत्यपाङ्गविक्षेपैः शान्तामर्षं वृकोदरम्।।**[6]

अत्र अपमानितं द्रौपदीं दृष्ट्वा भीमः प्रचण्ड क्रोधेन सभास्तम्भं उत्थापयति। एतद् दृष्टाऽपि सत्य-धर्म-दयाद्वारा युक्त द्यूतेन पराजितः युधिष्ठिरः सेङ्गितैः कटाक्षावलोकनैः वृकोदरं शान्तं करोति।

**गणिका-**

तत्कालीनसमाजे गणिका तथा वेश्याऽपि विनोदनस्य एकं माध्यमं आसीत्। धनिकाः तथा कामातुराः जनाः प्रभूतधनानां विनिमयेन तासाम् उपभोगं कुर्वन्ति स्म।[7]

**गीतं-नृत्यञ्च-**

अवसरसमये नारी-पुरुषमिलित्वा गीतं नृत्यञ्च कृत्वा दृष्ट्वा वा मनोविनोदनं कुर्वन्ति। बालचरितम् नाटके हल्लीसक-नृत्यस्य उल्लेखं दृश्यते। तत्र स्वामी-दामोदरः गोपकन्यकाभिः सह हल्लीसकं नृत्यं कर्तुं वृन्दावने आगच्छति।[8] अत्यन्तं रुचिकरं सललितञ्चास्ति इदं हल्लीसकं लोकनृत्यमिति-

**निर्भत्र्स्य कालियमहं परिविस्फुरन्तं**
**मूर्धाञ्चितैकचरणश्चलबाहुकेतुः।**
**भोगे विषोल्बणफणस्य महोरगस्य**
**हल्लीसकं सललितं रुचिरं वहामि।।**[9]

मानवैः वर्षवर्धनोत्सवे एकत्रे मिलित्वा नानाप्रकार-मङ्गलगीतानि गायन्ते नृत्यन्ते चेति पञ्चरात्रम् नाटके प्राप्यते।[10]

**सर्पक्रीडा-**

तदानीन्तनसमये सर्पाणां क्रीडापि जनानां मनोरञ्जनस्य एकः माध्यमः आसीत्। अहितुण्डिकः विषधरसर्पाणां वशीभूतकरणपूर्वकं क्रीडाप्रदर्शन माध्यमेन मनोविनोदनं कारयति। प्रतिज्ञायौगन्धरायणे अस्य उल्लेखः परिलक्ष्यते यदा गात्रसेवकः तस्य मित्राणां तुलना बन्धनात् मुक्तः कृष्णसर्पेण सह कृतम्।[11] यदा तु क्रीडाप्रदर्शनार्थं मञ्जूषायाः उद्घाटनं भवति तदा क्रुद्धः सर्पः क्रोधेन सस्य फणस्योन्मुक्तनं करोति स्म। एतादृशी उद्धृतिरपि प्रतिज्ञा-यौगन्धरायणे उपलभ्यते।[12]

**हास्यरसाभिनयः -**

मनोविनोदनाय चित्रविचित्र वेशभूषाधारणपूर्वकं स्वरपरिवर्तनं कृत्वा अभिनयपूर्वकं च जनानां हास्योत्पादनमाध्यमेन धनार्जनं कुर्वता डिण्डिका-नाम् उल्लेखः प्रतिज्ञायौगन्धरायणनाटके उपलभ्यते।[13]

**उत्सवाः -**

वत्सरस्य विभिन्न समये आयोजितोत्सव माध्यमेन मानवाः तेषां मनोरञ्जयन्ति। अस्मिन् उत्सवे वहुजनानां एकत्रे समावेशो भवन्ति एवं ते परस्परेण सह मिलित्वा आनन्दं कुर्वन्ति। शक्रध्वजोत्सव-धनुर्महोत्सव-वर्षवर्धनोत्सव-विवाहोत्सव-युद्धोत्सव इत्यादयः उत्सवाः तत्कालीनसमाजे प्रचलिता आसन्। एतेषाम् उत्सवानां परिचयाः अधः निरूप्यन्ते-

**शक्रध्वजोत्सवः –**

अयमुत्सवं देवराज-इन्द्रस्य कृते आयोज्यते। मध्यमव्यायोगः नाटके उत्सवस्यास्योल्लेखं दृश्यते।[14] एतत्तु इन्द्रदेवस्य सम्मानेन आयोजितः एको धार्मिकः सार्वजनिको-त्सवः आसीत्। समारोहोऽयं भाद्रपदशुक्लपक्षस्य अष्टमी तिथौ आरभ्य द्वादशी तिथिपर्यन्तं पञ्चदिवसात्मकं आसीत्। अस्य उत्सवस्य प्रमुखम् उद्देश्यन्तु इन्द्रदेवस्य सन्तुष्टि माध्यमेन सुवृष्टिः तथा प्रभुत सम्पदस्य प्राप्तिश्चासीत्। अद्यतन होलिकोत्सवेन सह अस्य किञ्चित् सायुज्यं परिलक्ष्यते।

**इन्द्रयज्ञोत्सवः –**

देवराजेन्द्रस्य नामानुसारेण उत्सवस्यास्य नामकरणं क्रियते। अतः एतदुत्सवं इन्द्रस्यास्ति इति मन्यते। बालचरितम् नाटके उत्सवस्यास्य सङ्केतं प्राप्यते।[15]

**वर्षवर्धनोत्सवः –**

वर्षवर्धनोत्सवस्य नामान्तरमस्ति जन्ममहोत्सवः। उत्सवोऽयं जन्मकालिकनक्षत्रस्य दिने आयुर्वर्धनायेव क्रियते। अस्मिन् दिने आगताः जनाः सहर्षेण आनन्दं आमोद-प्रमोदञ्च कुर्वन्ति एवं राजा दानार्थं सहस्र-गावः नगरस्य उपवने सज्जीं क्रियते। सर्वे गोपदारकाः गोपदारिकाश्च वस्त्राभूषणेन सज्जयित्वा अस्मिन् उत्सवे भागग्रहणार्थं बहुत्सकेन आगच्छन्ति।[16]

एतस्मिन् मङ्गलोत्सवे गोपबालकाः गोपबालिकाश्च आनन्देन गायन्ति नृत्यन्ति च।[17] एवंरूपेण वर्षवर्धनोत्सवः नाम जन्मोत्सवस्य पालनं साडम्बरेण नृत्य-गीत-वाद-दानादिकरणपूर्वकं तदानीन्तन समयेऽपि परिलक्ष्यते स्म।

**धनुर्महोत्सवः –**

तत्कालीनयुगे धनुर्मह (धनुर्यज्ञ) इति महोत्सवमन्यतममासीत्। अस्मिन्महोत्सवे राजा प्रधानतः मल्लयुद्धस्यैव आयोजनं क्रियते।

बालचरितम् इति नाटके दृश्यते यत् मथुरायामयं धनुर्महोत्सवं आयोज्यते।[18]

अस्मिन् उत्सवे राजनगरं तथा राजमार्गमत्यन्तं सुन्दररूपेण सुशोभ्यते। राजमहापथं पुष्पमाला अगरुधूपादिसुगन्धितपदार्थानां धूमैः ध्वजा पताकादिद्वारा सुसज्जितं क्रियते।[19]

अस्य महोत्सवस्य प्रधानाङ्गं मल्लयुद्धे आमन्त्रितः मल्लाः अनेक करणसन्धमेवमाबन्धप्रहारैः मल्लयुद्धं कुर्वन्ति।[20] राजा प्रासादमारुह्य अयं मल्लयुद्धं पश्यति-**"यावदहमपि प्रासादमारुह्य चाणूरमुष्टिकयोर्युद्धं पश्यामि"**।[21]

**विवाहोत्सवः –**

विविधोत्सवेषु विवाहोत्सवमेकं सामाजिकोत्सवः रीतिश्चास्ति। आनन्दमयोत्सवोऽयम् अत्यन्तोल्लासेन आमोद-प्रमोदेन च पाल्यते। स्वप्नवासवदत्तम्-नाटके वत्सराज-उदयनस्य एवं पद्मावत्योः विवाहं दृश्यते।[22]

**युद्धोत्सवः –**

भासनाटकचक्रस्यान्तर्गत कर्णभारम् नाटकस्य प्रथमाङ्के युद्धम् इत्ययं युद्धोत्सवः नाम्ना अभिधीयते। अस्मिन्नुत्सवे राजानः युद्धस्य वेशभूषा-अस्त्र-शस्त्रद्वारा सज्जयित्वा सारथियुक्तरथेन रणाङ्गने गच्छन्ति। यतो हि कर्ण-भारम्-नाटके उक्तं यत्- **"अये अयमङ्गराजः समरपरिच्छदपरिवृतः शल्यराजेन सह स्वभवनान्निष्क्रम्य इत एवाभिवर्तते। भोः किं न खलु युद्धोत्सवप्रमुखस्य दृष्टपराक्रमस्याभूतपूर्वो हृदयपरितापः"**।[23]

**निष्कर्षः –**

सामाजिकोत्सव-आमोद-प्रमोद-क्रीडा-विनोद विषये भासनाटकेषु वहुत्र उपलभ्यते। तद्विषये संक्षेपेण मया अस्मिन् लेखे उद्धरणपूर्वकं समुपस्थापितः। यथा- क्रीडासु भासनाटके उद्यान-क्रीडा, कन्दुक-क्रीडा, जल-क्रीडा, द्यूत-क्रीडा, सर्प-क्रीडादीनाम् उल्लेखः प्राप्यते। तथैव उत्सवेषु शक्रध्वजोत्सवः, विवाहोत्सवः, युद्धोत्सवः, वर्षवर्धनोत्सवः, धनुर्महोत्सवादिनाम् उल्लेखः प्राप्यते।

**पादटिप्पणी-**

1. अवि., अङ्क- 1, पृ.- 10
2. स्व.वा., अङ्क-2, पृ.- 36-37
3. **कः कालोऽहं भर्तृदारिकाया वासवदत्ताया उदके क्रीडितुकामाया भद्रवतीपरिचारकं गात्रसेवकं न प्रेक्षे।** प्र.यौ., अङ्क-4, पृ.- 105
4. **अत्रेदानीं धर्मच्छलेन वञ्चितो द्यूताश्रयवृत्तिर्युधिष्ठिरः।** पञ्चरा., अङ्क-1, पृ.- 36
5. पञ्चरा.- 1/37
6. दूतवा.- 1/8
7. चारु.- 1/17
8. बा.च., अङ्क- 3, पृ.-66
9. तत्रैव- 4/6
10. पञ्चरा., अङ्क- 2, पृ.- 62
11. प्र.यौ., अङ्क- 4, पृ.- 110
12. प्र.यौ.- 4/13
13. प्र.यौ., अङ्क- 3, पृ.- 72
14. म.व्या.- 1/47
15. बा.च., अङ्क- 1, पृ.- 20
16. तत्रैव, अङ्क- 2, पृ.- 60
17. तत्रैव, अङ्क- 2, पृ.- 61-62
18. बा.च., अङ्क- 4, पृ.- 95
19. बा.च., अङ्क-5, पृ.- 98-99
20. तत्रैव, अङ्क- 5, पृ.- 103
21. तत्रैव, अङ्क-5, पृ.- 101
22. स्व.वा., अङ्क- 3, पृ.- 44
23. कर्ण.भा., पृ.- 7

**सन्दर्भ ग्रन्थसूची-**


❖ भासनाटकचक्रम्, प्रधान-सम्पादकः डॉ.सुधाकर मालवीयः, चौखम्बा कृष्णदास अकादमी, वाराणसी
❖ कर्णभारम्, व्याख्याकारः श्री वैद्यनाथ झा, चौखम्बा कृष्णदास अकादमी, वाराणसी, 2017
❖ चारुदत्तम्, व्याख्याकारः पण्डित परमेश्वरदीन पाण्डेयः, चौखम्बा कृष्णदास अकादमी, वाराणसी, 2011
❖ दूतवाक्यम्, सम्पादको व्याख्याकारश्च डॉ. सुधाकर मालवीयः, कृष्णदास अकादमी, वाराणसी, 1987
❖ पञ्चरात्रम्, व्याख्याकारः डॉ. जगदीशचन्द्र मिश्रः, चौखम्बा कृष्णदास अकादमी, वाराणसी, 2015
❖ प्रतिज्ञायौगन्धरायणम्, व्याख्याकारः पण्डित वैद्यनाथ झा, चौखम्बा कृष्णदास अकादमी, वाराणसी, 2011
❖ बालचरितम्, व्याख्याकारः पण्डित रामनाथत्रिपाठी शास्त्री, चौखम्बा अमरभारती प्रकाशन, वाराणसी, 1979
❖ स्वप्नवासवदत्तम्, व्याख्याकारः डॉ. बालगोविन्द झा, चौखम्बा कृष्णदास अकादमी, वाराणसी, 2017


**सङ्केताक्षरसूची-**

अवि. - अविमारकम्
कर्णभा.- कर्णभारम्
चारु. - चारुदत्तम्
पञ्चरा. - पञ्चरात्रम्
प्र.यौ. - प्रतिज्ञायौगन्धरायणम्
दू.वा. - दूतवाक्यम्
बा.च. - बालचरितम्
म.व्या.- मध्यमव्यायोगः
स्व.वा.- स्वप्नवासवदत्तम्